श्री काळी प्रातः स्मरण स्तोत्रं

श्री काळी प्रातः स्मरण स्तोत्रं

प्रातः स्मरामि मदिरारुणपूर्णनेत्रां
काळीं कराळवदनां कमनीयमात्रां |
उद्यन्नितानतगतां विगतां स्वसंस्थान्
धात्रीं समस्त जगतां करुणार्द्रचित्तां || 1 ||

प्रातर्भजामि भुजगाभरणामपर्णां
श्रीदक्षिणां ललितवाललतां सपर्णां |
कारुण्यपूर्णनयनां नगराजकन्यां
धन्यां वराऽभयकरां परमार्तिहंत्रीं || 2 ||

प्रातर्नमामि नगराजकुलोद्भवां तां
कांतां शिवस्य करवालकपालहस्तां |
त्रैलोक्यपालनपरां प्रणवादिमात्रां
नागेंद्रहारकलितां ललितां त्रिनेत्रां || 3 ||

श्लोकत्रयमिमं पुण्यं प्रातः प्रातः पठेन्नरः |
तमोबुद्धिं समुत्तीर्य सपश्येत् काळिकापदं || 4 ||

इति श्री काळी प्रातः स्मरण स्तोत्रं |